Class. 8th Chapter - 4

# संस्कृतस्य महत्त्वम्

प्रश्नानाम् उत्तराणि लिखत ।

(क) विश्वस्य प्राचीनतमा भाषा का ?

उत्तर → विश्वस्य प्राचीनतमा भाषा संस्कृतभाषा अस्ति ।

(ख) वेदाः कति सन्ति ? के च ते ?

उत्तर – वेदाः चत्वारः सन्ति - ऋग्वेदः, सामवेदः, यजुर्वेदः, अथर्ववेदश्च ।

(ग) संस्कृतभाषायां अन्ये के के ग्रन्थाः लिखिताः सन्ति ?

उत्तर → संस्कृतभाषायां अन्ये - उपनिषदः, पुराणानि, धर्मग्रन्थाः, दर्शनग्रन्थाः, विज्ञानग्रन्थाः च लिखिताः सन्ति ।

(घ) सगणकयंत्राय संस्कृतभाषा उपयुक्ततमा अस्ति कथम् ?

उत्तर → संगणक यंत्राय संस्कृतभाषा उपयुक्ततमा अस्ति, यतो हि अस्यां उच्चारण - लेखनस्य साम्यम्, सूत्रात्मक शैली च प्रयुक्ता ।

Scanned by TapScanner

(ङ.) संस्कृतस्य दश-रचनाकाराणां नामानि लिखत।

उत्तर → संस्कृतस्य दश रचनाकाराणां नामानि इमानि सन्ति - वाल्मीकि:, व्यास:, भास:, कालिदास: बाण-भट्ट:, भवभूति:, दण्डी, भारवि, माघ:, विष्णुशर्मा च

(च) क: ग्रन्थ: विश्वस्य सर्वासु भाषासु अनूदित: वर्तते?

उत्तर → 'पञ्चतन्त्रम्' विश्वस्य सर्वासु भाषासु अनुदित: वर्तते।

AI DUAL CAMERA

Scanned by TapScanner

## अभ्यासः

**1 प्रश्नानाम् उत्तराणि लिखत।**

(क) विश्वस्य प्राचीनतमा भाषा का?

(ख) वेदाः कति सन्ति? के च ते?

(ग) संस्कृतभाषायां अन्ये के के ग्रन्थाः लिखिताः सन्ति?

(घ) संगणकयंत्राय संस्कृतभाषा उपयुक्ततमा अस्ति। कथम्?

(ङ) संस्कृतस्य दश-रचनाकाराणां नामानि लिखत।

(च) कः ग्रन्थः विश्वस्य सर्वासु भाषासु अनूदितः वर्तते?



**2 एतेषां शब्दानां विभक्तिं, वचनं लिङ्गं च लिखत।**

| | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|
| (क) अस्याम् | सप्तमी | एकवचनम् | स्त्रीलिंग |
| (ख) भाषायाः | षष्ठी | एकवचनम् | स्त्री. |
| (ग) रचनाम् | द्वितीया | एकवचनम् | स्त्री. |
| (घ) काव्यानि | प्रथमा/द्वितीया | बहुवचनम् | नपुं. |
| (ङ) संस्काराः | प्रथमा | बहुवचनम् | पुंलिंग |
| (च) सूत्रे | सप्तमी | एकवचनम् | नपुं० |
| (छ) सूक्तयः | प्रथमा | बहुवचन | स्त्री. |
| (ज) विकासः | प्रथमा | एकवचन | पुं० |

**3 एतेषां पदानां सन्धि-विच्छेदं पदच्छेदं वा कुरुत।**

(क) अस्यामेव = अस्याम् + एव

(ख) सर्वेऽपि = सर्वे + अपि

(ग) सामर्थ्यमस्ति = सामर्थ्यम् + अस्ति

(घ) इदानीमपि = इदानीम् + अपि

(ङ) स्वीकृतमस्ति = स्वीकृतम् + अस्ति



Scanned by TapScanner

**4** अधः प्रदत्तानां संयोगं कुरुत।

(क) अस्याम् + एव = अस्यामेव (घ) वाक्यम् + एव = स्वीकृतमस्ति
(ख) संस्कृतभाषायाम् + एव = संस्कृतभाषायामेव (ङ) अस्याम् + एव = वाक्यमेव
(ग) स्वीकृतम् + अस्ति = स्वीकृतमस्ति (च) इदानीम् + अपि = इदानीमपि

**5** प्रत्ययान्तं पदं निर्मीयत।

(क) पठ् + तुमुन् = पठितुम् (घ) भू + तुमुन् = वाक्यमेव
(ख) पठ् + अनीयर् = पठनीयः (ङ) भू + क्त्वा = अस्यामेव
(ग) पठ् + क्त्वा = पठित्वा (च) पा + तुमुन् = इदानीमपि

**6** उचितं मेलनं कुरुत।

| | |
|---|---|
| ऋग्वेदः | विश्वस्य प्राचीनतमा भाषा |
| संगणकस्य कृते उपयुक्ततमा | शिशुपालवध महाकाव्यम् |
| माघः | संस्कृतभाषा |
| संस्कृतभाषा | संसारस्य प्राचीनतमः ग्रन्थः |



**7** वाक्यानि शुद्धानि कुरुत।

(क) सः मानवतां कृते कार्यं कुर्वन्ति। सः मानवतायाः कृते कार्य करोति।
(ख) संस्कृतभाषा सरलं मधुरं च अस्ति। संस्कृतभाषा सरला मधुरा च अस्ति।
(ग) संस्कृतस्य प्रयोगः सम्पूर्णे देशे भवन्ति। संस्कृतस्य प्रयोगः सम्पूर्णे देशे भवति।
(घ) वहवः कवयः इदानीमपि काव्यं करोति। बहवः कवयः इदानीमपि काव्यं कुर्वन्ति।

**8** संस्कृतभाषायाः महत्त्वविषये दश-वाक्यानि संस्कृतभाषया लिखत।

**9** देशस्य विकासाय बहूनि तत्त्वानि अपेक्षन्ते। तत्र भाषातत्त्वस्य विकासस्य अवदानमपि अस्ति इति विषयमधिकृत्य छात्रसंसदि श्रावयत।

**10** भाषाशिक्षणस्य कृते किं किं अत्यावश्यकमस्ति? सूचीं कुरुत।



NOT FOR SALE
COMPLIMENTARY COPY

Scanned by TapScanner